शरावति विकाराय करीषेभ्यो भवन्ति हि ॥
एवमादिरसङ्ख्यातो गणः संस्वेदजो मया ।
समासान्निर्हितो ह्येष पाकर्म्मवशजः स्मृतः ॥"
इति वह्निपुराणे काश्यपीयवंशनामाध्यायः ॥

स्वेदनं, क्ली, ( स्विद्+ल्युट् । ) स्वेदः । इति मेदिनी ॥ स्वेदनयन्त्रं यथा,—
"निबद्धमौषधं सूतं भूर्ज्जे तत्त्रिगुणाम्बरे ।
रसपोटलिकां काष्ठे दृढं बद्धा गुणेन हि ॥
सन्धानपूर्णे कुम्भान्तः स्वावलम्बनसंस्थितम् ।
अधस्ताज्ज्वालयेद्वह्निं तत्तदुक्तक्रमेण हि ।
दोलायन्त्रमिदं प्रोक्तं स्वेदनाख्यं तदेव हि ॥"
सन्धानं काञ्जिकादि ।
"साम्बुस्थालीमुखे बद्धे वस्त्रे स्वेद्यं निधाय च ।
पिधाय पच्यते यत्र तद्यन्त्रं स्वेदनं स्मृतम् ॥"
इति भावप्रकाशः ॥
( स्वेदयतीति । स्विद्+णिच्+ल्युः । स्वेदके, त्रि । यथा, सुश्रुते । ३ । ४ ।
"स्वेदनो दुर्गन्धः पीतशिथिलाङ्गस्ताम्रनखनयनतालुजिह्वोष्ठपाणिपादतल इत्यादि ॥" )

स्वेदनिका, स्त्री, ( स्वेदनमस्त्यस्या इति । ठन् । ) कन्दुः । इति हेमचन्द्रः ॥ भर्ज्जनपात्रम् । भर्ज्जनशाला च ॥

स्वेदनी, स्त्री, ( स्विद्यतेऽनयेति । स्विद्+ल्युट् । ङीप् । ) लौहमयपात्रम् । ताओया इति कोहता इति च ख्यातम् । इति भरतः ॥ तत्पर्य्यायः । कन्दुः २ । इत्यमरः । २ । ९ । ३० स्वेदनिका ३ । इति हेमचन्द्रः ॥

स्वेदमलोज्झितदेहः, पुं, ( स्वेदमलेन उज्झितः देहो यस्य । ) सर्व्वकल्पीयजिनोत्तमः । इति हेमचन्द्रः ॥ स्वेदमलत्यक्तकायश्च । तद्युक्ते, त्रि ॥

स्वेदविप्रुट्, [ष्] स्त्री, घर्म्मबिन्दुः । स्वेदस्य विप्रुट् बिन्दुः । इति षष्ठीतत्पुरुषसमासनिष्पन्ना ॥

स्वैरः, त्रि, ( स्वेन स्वातन्त्र्येण ईर्त्ते इति । ईर गतौ + अच् । "स्वादीरेरिणोः ।" ६ । १ । ८९ । इत्यस्य वार्त्तिकोक्त्या वृद्धिः । ) स्वच्छन्दः । ( यथा, रघुः । २ । ५ ।
"अव्याहतैः स्वैरगतैः स तस्याः
सम्राट् समाराधनतत्परोऽभूत् ।" )
मन्दः । इति मेदिनी ॥ ( यथा, महाभारते । ४ । ६६ । ४९ ।
"अथोत्तरः शुभैर्गन्धैर्माल्यैश्च विविधैस्तथा ।
आकीर्य्यमाणः संहृष्टो नगरं स्वैरमागमत् ॥" ॥ )
वृथालापः । यथा, तत्रैव । १ । ४२ । २ ।
"नैवान्यथेदं भविता पितरेष ब्रवीमि ते ।
नाहं मृषा ब्रवीम्येवं स्वैरेष्वपि कुतः शपन् ॥" )

स्वैरता, स्त्री, ( स्वैरस्य भावः । स्वैर+तल् । ) स्वैरिता । इत्यमरटीकायां रायमुकुटः । ३ । २ । २ ।

स्वैरिणी, स्त्री, ( स्वेनैव ईरयितुं शीलमस्याः । ईर+णिनिः । ङीप् । स्वादीरेरिणोरिति वृद्धिः । ) व्यभिचारिणी इत्यमरः । २ । ६ । ११ ॥ सा तु चतुःपुरुषगामिनी ( यथा, महाभारते । १ । १२३ । ७३—७४ ।
"पाण्डुस्तु पुनरेवैनां पुत्त्रलोभात् महायशाः ।
वक्तुमैच्छद्धर्म्मपत्नीं कुन्ती त्वेनमथाब्रवीत् ॥
नातश्चतुर्थं प्रसवमापत्स्वपि वदन्त्युत ।
अतः परं स्वैरिणी स्याद्बन्धकी पञ्चमे भवेत् ॥" )

स्वैरिता, स्त्री, ( स्वैरिणो भावः । तल् । टाप् । ) स्वच्छन्दता । तत्पर्य्यायः । यदृच्छा २ । इत्यमरः । ३ । २ । २ ॥

स्वैरिन्ध्री, स्त्री, परवेश्मस्था स्ववशा शिल्पकारिणी नारी । इति शब्दरत्नावली ॥ परगृहस्था स्वतन्त्रा प्रसाधनानुलेपनादिशिल्पकारिणीति विशेषणत्रययुक्ता या सा सैरिन्ध्री । स्वैरं स्वाच्छन्द्यं धरतीति स्वैरिन्ध्री निपातनात् । स्वैरिन्ध्री परवेश्मस्था शिल्पकृत् स्ववशा स्त्रियाम् । इति दन्त्यादौ रभसः । इत्यमरटीकायां भरतः ॥ अस्या रूपान्तरं सैरन्ध्री सैरिन्ध्रिः इति च टीकान्तरम् ॥

स्वैरी, [ न् ] त्रि, स्वेनैव ईरितुं शीलमस्य । ईर गतौ+णिनिः । स्वतन्त्रः । इत्यमरः । ३ । १ । १५ ॥ ( यथा, महाभारते । १३ । १४२ । २१ ।
"सिद्धिवादेषु संसिद्धास्तथा वननिवासिनः ।
स्वैरिणो दारसंयुक्तास्तेषां धर्म्मः कथं स्मृतः ॥" )

स्वोपार्ज्जितः, त्रि, ( स्वेनोपार्ज्जितः । ) स्वयमर्ज्जितः । स्वयमुपात्तः । यथा, पिता चेत् पुत्त्रान् विभजेत्तस्य स्वेच्छा स्वयमुपात्तेऽर्थे पैतामहे तु पितापुत्त्रयोस्तुल्यं स्वामित्वम् । इति विष्णुसूत्रम् । अपि च । मनुविष्णू ।
"पैतृकन्तु पिता द्रव्यमनवाप्तं यदाप्नुयात् ।
न तत् पुत्त्रैर्भजेत् सार्द्धमकामः स्वयमर्ज्जितम् ॥"
तत् स्वयमर्ज्जितमिति कृत्वा न विभजेदित्यन्वयः । एतत्तु स्थावरविषयम् । मन्वादावनुक्तेऽपि पितुरेव स्वाच्छन्द्यम् ।
"स्थावरं द्विपदञ्चैव यद्यपि स्वयमर्ज्जितम् ।
असम्भूय सुतान् सर्व्वान् न दानं न च विक्रयः ॥
पितुः प्रसादात् भुज्यन्ते वस्त्राण्याभरणानि च ।
स्थावरन्तु न भुज्येत प्रसादे सति पैतृके ॥"
इति मिताक्षराधृतवचनमपि पितामहधनपरम् । पित्रा च स्वोपार्ज्जितं स्थावरं दत्तं भुज्यत एवेति । अन्यथा मूलभूतश्रुत्यन्तरकल्पनापत्तेः । इति दायतत्त्वम् ॥ * ॥ स्वोपार्ज्जितं द्विविधम् । पित्रादिधनाद्युपघातेन स्वेनोपार्ज्जितम् । तदनुपघातेन उपार्ज्जितञ्च । तत्र विभागविधिर्यथा । व्यासः ।
"अनाश्रित्य पितृद्रव्यं स्वशक्त्याप्नोति यद्धनम् ।
दायादेभ्यो न तद्दद्यात् विद्यालब्धञ्च यद्भवेत् ॥"
कात्यायनः ।
"द्व्यंशहरोऽर्द्धहरो वा पुत्त्रवित्तार्ज्जनात् पिता ।"
पुत्त्रवित्तार्ज्जनात् । क्लाद्विती भावा द्रव्यवत् प्रकाशते इति न्यायात् पुत्त्रार्ज्जितवित्तात् पितुर्द्व्यंशित्वं पितृधनानुपघातविषयं भ्रातृधनोपघातविषयञ्च । अर्ज्जकस्य तु द्व्यंशित्वम् । भ्रातृधनोपघाते तु तेषामप्येकांशित्वं वक्ष्यमाणवचनात् । पितुरर्द्धहरत्वन्तु पितृद्रव्योपघाताद्गुणवत्त्वाद्वा इति दायभागः ॥ अनुपघाते पिता द्व्यंशहरः । अर्ज्जकत्वात् स्वयमपि द्व्यंशहरः । इतरेषामनंशित्वम् । भ्रातृद्रव्योपघाते तु तेषामप्येकांशः । इति द्व्यंशार्द्धांशयोर्भेदकथनम् ॥ * ॥ साधारणधनार्ज्जितेऽपि विशेषमाह व्यासः ।
"साधारणं समाश्रित्य यत्किञ्चित् वाहनायुधम् ।
शौर्य्यादिनाप्नोति धनं भ्रातरस्तत्र भागिनः ।
तस्य भागद्वयं देयं शेषास्तु समभागिनः ॥"
अत्र भ्रातर इत्युपलक्षणं पितृव्यादयोऽपि बोद्धव्याः । तस्यार्ज्जकस्य । साधारणोपघाते यस्य यावतोऽंशस्याल्पस्य महतो वा उपघातस्तस्य तदनुसारेण भागकल्पना कार्य्या । इति दायभागः ॥ इति च दायतत्त्वम् ॥

स्वोरसः, पुं, शिलापिष्टकल्कः । यथा,—
"स्वोरसः स्वरसः प्रोक्तः कल्को दृषदि पेषितः ॥"
इति शब्दचन्द्रिका ॥

---

## ह

ह, हकारः । स तु व्यञ्जनत्रयस्त्रिंशवर्णः । अष्टमवर्गीयचतुर्थवर्णश्च । तस्य उच्चारणस्थानं कण्ठः । इति व्याकरणम् ॥ ( यथा च शिक्षायाम् । १७ ।
"कण्ठ्यावहाविचुयशास्तालव्या ओष्ठजावुपू ॥" )
अस्य स्वरूपं यथा,—
"हकारं शृणु चार्व्वङ्गि ! चतुर्व्वर्गप्रदायकम् ।
कुण्डलीद्वयसंयुक्तं रक्तविद्युल्लतोपमम् ।
रजःसत्त्वतमोयुक्तं पञ्चदेवमयं सदा ।
पञ्चप्राणात्मकं वर्णं त्रिशक्तिसहितं सदा ।
त्रिबिन्दुसहितं वर्णं हृदि भावय पार्व्वति ! ॥"
इति कामधेनुतन्त्रम् ॥ * ॥
( वङ्गीयवर्णमालायाम् ) अस्य लेखनप्रकारो यथा,—
"ऊर्द्ध्वादाकुञ्चिता मध्ये कुण्डलीत्वं गता त्वधः ।
ऊर्द्ध्वं गता पुनः सैव तासु ब्रह्मादयः क्रमात् ।
मात्रा च पार्व्वती ज्ञेया ध्यानमस्य प्रचक्ष्यते ॥
करीषभूषिताङ्गीञ्च साट्टहासां दिगम्बराम् ।
अस्थिमाल्यामष्टभुजां वरदामम्बुजेक्षणाम् ॥
नागेन्द्रहारभूषाढ्यां जटामुकुटमण्डिताम् ।
सर्व्वसिद्धिप्रदां नित्यां धर्म्मकामार्थमोक्षदाम् ॥
एवं ध्यात्वा हकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
इति वर्णोद्धारतन्त्रम् ॥ * ॥
अस्य नामानि यथा,—
"हः शिवो गगनं हंसो नागलोकोऽम्बिकापतिः ।
नकुलीशो जगत्प्राणः प्राणेशः कपिलामलः ॥
परमात्मात्मजो जीवो यवाकः शान्तिदोऽङ्कुशः
मृगा भयोऽरुणा स्थाणुः क्रूटकूपविरावणः ॥
लक्ष्मीर्म्मविहरः शम्भुः प्राणशक्तिर्ललाटजः ।
स्वकोपवारणः शूली चैतन्यं पादपूरणः ।
महालक्ष्मीः परं शम्भुः शाखोठः सोममण्डलः ॥"
इति वर्णाभिधानम् ॥ * ॥